<u>ब्रेन इंटरनेशनल स्कूल</u>

सत्र □25□26□

अभ्यास पत्र□1

कक्षा–दश

विषय संस्कृत□कोड संख्या□119□

सामान्याः निर्देशाः□

**1** अस्मिन् प्रश्नपत्रे **17** प्रश्नाः सन्ति

**2** सर्वे प्रश्नाः अनिवार्याः सन्ति।

**3** प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

**4** प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि।

**5** उत्तराणि पृथक् उत्तरपुस्तिकायां □अनुसार लेखनीयानि।

**6** लेखने स्वच्छता स्पष्टता च स्यात्।

**7** प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रस्वरूपं

खण्ड□क – अपठित अवबोधनम् □ **10** अङ्काः

खण्ड□ख – रचनात्मक कार्यम् □ **5** अङ्काः

खण्ड□ग – अनुप्रयुक्तव्याकरण □**15** अङ्काः

खण्ड□घ – पठित अवबोधनम् □**10** अङ्काः

खण्ड□- क अपठित अवबोधनम्

प्रश्न **1** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

एकस्मिन् गृहे आसीत् एका वीणा । यदा कदा यः कोऽपि तत्र गच्छति स वीणां वादयति स्म। परन्तु वीणाशब्दः सम्यक् नास्फुरत्।तस्याः शब्दं श्रुत्वा सर्वे कर्णपीडाम् अनुभवन्ति स्म। कदाचित् □धेन गृहमुख्यः तां वीणा बहिः निष्कास्य स्थापितवान्।एकः भिक्षुकः तां वीणा प्राप्य गृहस्य वरण्डे उपविश्य तां वादितवान्। वीणायाः मनोहरशब्देन जनाः तत्र एकत्रिताः अभवन्। परिवारसदस्याः अपि चकिता अभवत्। यथेयं वीणा तथा जीवनवीणा तस्याः स्वरसंयोजनार्थम् अस्माभिः यत्नः कर्त्तव्यः ।सत्कर्मसाधनं विना कौशलशिक्षण विना च जीवन वीणायां स्वरः सर्वेषाम् आकर्षणं समर्था न स्यात्। अतः सर्वैः मानवैः तदर्थमेव यत्नः कर्त्तव्यः।

**I** एकपदेन उत्तरत□ □2□

i) एकस्मिन् गृहे का आसीत्□

ii) वीणायाः शब्दं श्रुत्वा सर्वे किम् अनुभवन्ति स्म□

**II** पूर्णवाक्येन उत्तरत□ □4□

i) गृहम् वरण्डे उपविश्य कः वीणां वादितवान्□

ii) वीणायाः मनोहरशब्देन के एकत्रिताः अभवन् □

**III** भाषिक कार्यम्□ □4□

i) ‘तस्याः स्वरसंयोजनार्थम् अत्र ‘तस्याः’ इति सर्वनामपदं कस्मै प्रयुक्तम्□□जीवनवीणायैक्र वीणायै क्र कर्णपीडायैक्र सर्वेः□

ii) गद्यांशे ‘स्थापितवान्’ इति क्रियापदस्य किम् कर्तृपदं अस्ति□□वीणाक्रगृहमुख्यःक्रभिक्षुकःक्रजनाः□

iii) ‘आकर्ण्य’ इत्यस्य पर्यायपदम् अत्र किम्□□उपविश्यक्रनिष्कास्यक्रश्रुत्वाक्रप्राप्य□

iv) ‘सर्वे’ इति पदस्य किम् ि□्यापदम् अनुच्छेदे प्रयुक्तम्□□कर्त्तव्यःक्रवादितवान्क्रस्यात्क्रअनुभवन्ति स्म□

## खण्ड□- ख रचनात्मक कार्यम्

**प्रश्न 2 भवान् स्निग्धः। नवप्रविष्टस्य वैदेशिकस्य प्राचार्यपुत्रस्य वर्णनं कुर्वन् अग्रजम् प्रति लिखितं पत्रं मंजूषायाम् प्रदत्तैः उचितपदैः पूरयित्वा पुनः लिखत।** **□□□10□5□**

**नवोदय विद्यालय छात्रावासः**

**दिल्लीतः**

**दिनांङ्कः ............**

**1 ..............अग्रजः भ्रातः**

**सादरं अभिवादनम्**

**अहम् अत्र 2............... अस्मि। अस्माकं दशमकक्षायां 3 ............... आगतः प्राचार्य महोदयस्य पुत्रः प्रविष्टः। सः तु अतीव अनुशासनप्रियः। अस्वच्छतां तु सः न 4 ............... एव। सः अतीवयोग्यः संस्कृतानुरागी च। सः वदति विदेशेषु सर्वे संस्कृतं 5 ............... उत्सुकाः। संस्कृते यानि ज्ञान रत्नानि सन्ति तानि 6 ............सन्ति। यदा भवान् अत्र आगमिष्यन्ति तदा तेन सह 7 ............... करिष्यामि। परिवारे 8 ............... मम प्रणामांजलि निवेदनीया।**

**भवताम् प्रियः 9............**

**10...............**

| |
|---|
| **परिचयः □स्निग्धः □समादरणीय □सहते □जीवनपयोगिनि □अनुजः □विदेशात् □पठितुम् □सर्वेभ्यः □कुशली** |

**प्रश्न 3 अधः प्रदत्तचित्रस्य वर्णनं मञ्जूषायाः सहायतया पञ्चसु वाक्येषु संस्कृतेन कु□त।** **□5□**



| |
|---|
| **उपवनम्□बालिकाः□वृक्षाः □पादपाः □प्रसन्नाः □पञ्च □अस्ति □सन्ति □□डन्ति □कन्दुकेन □ शोभन्ते □पर्वताः □पक्षिणः □आकाशे□पश्यन्ति □भ्रमन्ति □परिवेशः □सुंदरः** |

प्रश्न 4 निम्नलिखितं सवादं मञ्जूषायाः सहायतया रिक्तस्थानपूर्ति कृत्वा सम्पूरयत। □□□10□5□

छात्रः □गु□देव□भवान् संस्कृतभाषायाः महत्त्वमुपरि किञ्चिद् वदतु ।

शिक्षकः □पुत्र□संस्कृतभाषा 1 ............।

छात्रः □भवान् इदं कथं कथयति यत् संस्कृतभाषां सर्वप्राचीना सर्वोत्कृष्टा च अस्ति□

शिक्षकः □प्रिय वत्स □शृणु 2 ............।

छात्रः□इदं तु सत्यमस्ति यत् संस्कृतस्य व्याकरणं तु विशालतमं वर्तते।परम् एषा तु सर्वप्राचीना कथम्□

शिक्षकः□एतत् इदं 3..................

छात्रः □गु□देव□विज्ञानक्षेत्रे कथम् इदम् ज्ञायते□

शिक्षकः- पुत्र! संसारस्य विज्ञाने ये शब्दाः प्रयुज्यते 4............।

छात्रः □गु□वर□अन्तरिक्षे विज्ञाने कथं संस्कृतशब्दाः साहाय्यं कुर्वन्ति।

शिक्षकः- 5.....................।

छात्रः□भवान् सत्यं वदतिअहम् अधुना अस्याः भाषायाः अध्ययनं प्राणपदेन करिष्यामि।

शिक्षकः □उत्तमम् । भवान् अग्रे वर्धतु।

| |
|---|
| सर्वप्राचीना सर्वोत्कृष्टा च अस्ति □पुत्र □अन्तरिक्षे तु गु□त्वाकर्षण शून्यतया शब्दानां □र्थाः परिवर्तिता भवन्ति अतः अन्यानां भाषाणां अनेन अर्थाः पतिवर्तन्ते परं संस्कृतेन सह एतत् न भवति□संस्कृतस्य व्याकरणं तु विशालतमं वर्तते□ ते तु पूर्वतः एव संस्कृतभाषायां सन्ति□ यत् संस्कृतभाषायाः शब्दाः तु सर्वासु भाषासु तत्सम् तद्भव वा रूपेण सन्ति। |

खण्ड□- ग अनुप्रयुक्तव्याकरणं

प्रश्न 5 अधोलिखितवाक्येषु रेखांकितपदेषुसन्धिं सन्धिविच्छेदं वा कु□त। □4□

1□ उद्यमेन + एव सिध्यन्ति कार्याणि।

क□ उद्यमैनेव ख□उद्यमेनैव ग□उद्यमै नैव घ□ उद्यमैनव

2□मम मित्रं शास्त्रेषु पारं + गतः।

क□पारंगतः ख□पारम्गतः ग□पारङ्गतः घ□पारगतः

3□ तत् + श्रुत्वा यूथपतिः सगद्गदम् उक्तवान्।

क□तच्शुत्वा ख□तच्छुत्वा ग□तत्छुत्वा घ□तत्श्रुत्वा

4□समधे नमस्ते□

क□नमः + स्ते ख□नमः + न्ते ग□नमः +ते घ□न + मस्ते

**क□अनेके  ख□अनेका  ग□अनेकः  घ□अनेकाः**

**इ□तत्र वानराः अपि कूर्दति।**

**क□कूर्दतः  ख□कूर्दन्ति  ग□कूर्दसि  घ□कूर्दन्ति**

**ई□ अहम् संस्कृतं पाठयति।**

**क□पठसि  ख□पठन्ति  ग□पठति  घ□पठामि**

## खण्ड□- घ पठित □अवबोधनम्

**प्रश्न 11 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- "भो! किमिदम् उच्यते□न वयं स्वर्ग समानोपभोगान् विहाय अटव्यां क्षार तिक्त कषाय कटु रूक्षफलानि भक्षयिष्यामः।" तच्छुत्वा साश्रुनयनो यूथपतिः समद्गदम् उक्तवान्- "रसास्वाद लुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।

**I एकपदेन उत्तरत□** **□2□□□1□**

क□कः वनं गन्तुम् उद्यतः भवति□

ख□ कपयः केन उद्धताः आसन्□

**II पूर्णवाक्येन उत्तरत□** **□2□**

क□साश्रुनयनो यूथपतिः समद्गदम् किम् उक्तवान्□

**III भाषिक कार्यम्□** **□2□**

क) 'साश्रुनयनः' इति पदयोः किम् विशेषणपदम् □

ख) 'रसास्वाद लुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ।' अस्मिन् वाक्ये 'जानीथ' इति क्रियापदस्य किम् कर्तृपदं अस्ति□

**प्रश्न 12 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

युधिष्ठिरः□सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यन्ति।

श्रीकृष्णः□तर्हि न जानासि तस्य मनो वृत्तिम्। पितुः उपदेशेन असन्तुष्टः स एकदा द्वारका पुरीम् आगच्छत्। ब्रह्मास्त्रं दत्वा सः सुदर्शन च□म् अवाञ्छत्।

युधिष्ठिर□□साश्चर्यम्□कथं च□म् इति।

श्रीकृष्णः□आम्□मया कथितम्। नाहं त्वतः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदा□शक्तिं□धनुःच□ वा इच्छसि□तुभ्यं ददामि।

युधिष्ठिरः□ततस्ततः।

**I एकपदेन उत्तरत□** **□2□□□1□**

क□द्रौणिः श्रीकृष्णं किम् अवाञ्छत्□

ख□कः एकदा द्वारकापुरीम् आगच्छत्□

**II पूर्णवाक्येन उत्तरत□** **□2□**

क□ किं दत्वा द्रौणिः सुदर्शन च□म् अवाञ्छत्□

**III भाषिक कार्यम्□** **□2□**

क) 'स एकदा द्वारका पुरीम् आगच्छत्।' अस्मिन् वाक्ये □यापदं किम्□

ख) 'मनोविचारम्' इत्यस्य किम् पर्यायपदमत्र प्रयुक्तम्□

**प्रश्न 13अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

**□धाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रशादं बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।**

**I I एकपदेन उत्तरत□** **□2□□□1□**

क□□धात् किम् भवति□

ख□ प्राणी कथं प्रणश्यति□

**II पूर्णवाक्येन उत्तरत□** **□2□**

क□बुद्धिनाशात् किम् भवति□

**III भाषिक कार्यम्□** **□2□**

क□'नष्टः भवति' इत्यर्थे अत्र श्लोके किं पदं प्रयुक्तं□

ख□ अस्मिन श्लोके 'सम्मोहः' इति कर्तृपदस्य □ियापदं किम्□

**प्रश्न 14 रेखांकित पदानि आधृत्य प्रश्ननिर्माण कु□त।** **□5□**

क□**<u>आचार्यः</u>** पुत्रं सावधानम् अकरोत्।

ख□कामस्य नाशाय **<u>इन्द्रियाणि</u>** वशं करणीयानि।

ग□ ज्वलम् मेषः **<u>अश्वशालां</u>** प्रविशति।

घ□ सूर्योदयः **<u>तमः</u>** नश्यति।

ङ□ **<u>नेपथ्ये</u>** काकध्वनिः श्रूयते।

**प्रश्न 15 अधोलिखितश्लोकयोः अन्वये उचितैः पदैः रिक्तस्थान पूरयत।** **□4□□□2□**

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्य लयसमर्थं च षडेते षाडकाः गुणाः।।

अन्वयः□माधुर्यम् ............ पदच्छेदः तु ............ धैर्य लय ............ च एते ............ पाठकाः गुणाः □सन्ति□

| सुस्वरः □अक्षरव्यक्तिः षड् □समर्थम् |
|---|

**प्रश्न 16 रेखांकितपदानां प्रसंगानुसारं शुद्धम् अर्थम् लिखत।** **□3□**

अ□अभ्यासेन तु **<u>कौन्तेय</u>** वैराग्येण च गृह्यते।

क□ भीमः ख□अर्जुनः ग□नकुल घ□श्री कृष्णः

आ□ **<u>सकलं</u>** जगत् ध्वस्तं भविष्यति।

क□ समस्तम् ख□ईश्वरीयम् ग□अर्धम् घ□विनाशं

इ□ <u>सपदि उपायः □ियताम्।</u>

क□ एकपदेन   ख□पादेन सह   ग□ झटिति

**प्रश्न 17 मञ्जूषायाः सहायतया पाठाधारितं कथापूर्तिं कुरुत।** **□10□□□5□**

एकस्मिन् समये **1………** शिविनां राजा अभवत्। दान धनर्मादि कारणेन सः **2…………** इव आसीत्। तेन निर्धनानां सहायतार्थं **3…………** समन्ततः धन धान्यमृद्धाः **4……** निर्मिताः। तत्र याचकाः आगत्य अन्नम्□पानम्□धनम्□रजतम्□सुवर्णं च यथेच्छं **5……** अनयन्। तस्य दान शीलतायाः **6………** देवराजः इन्द्रः एकदा तस्य समीपम् आगम्य तम् **7………** अयाचत्। ततः नृपः तस्मै स्व द्वे नेत्रे एव **8…………** । पश्चात् इन्द्रः तस्य **9………** अकरोत्। पश्चात् एकदा राजा **10 …………** विहरति स्म। तदा तत्र आगम्य शक्रः तस्मै द्वे नेत्रे एव अयच्छत्।

| **मञ्जूषा □** | **नगरस्य □दानशालाः □बोधिसत्वः □सरसि □नेत्रम् □अयच्छत् □प्रजायाः □परीक्षार्थम् □दानम् □प्रशंसाम्** |
| --- | --- |

ब्रेन इंटरनेशनल स्कूल

सत्र □25□26□

अभ्यास पत्र□2

कक्षा–दश

विषय सस्कृत□कोड संख्या□119□

सामान्याः निर्देशाः□

1 अस्मिन् प्रश्नपत्रे 17 प्रश्नाः सन्ति

2 सर्वे प्रश्नाः अनिवार्याः सन्ति।

3 प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

4 प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि।

5 उत्तराणि पृथक् उत्तरपुस्तिकायां □आनुसार लेखनीयानि।

6 लेखने स्वच्छता स्पष्टता च स्यात्।

7 प्रश्नसंख्या अवश्यमेव लेखनीया।

7 लेखने स्वच्छता स्पष्टता च स्यात्।

8 प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रस्वरूपं

खण्ड□क – अपठित अवबोधनम् □ 10 अङ्काः

खण्ड□ख – रचनात्मक कार्यम् □ 5 अङ्काः

खण्ड□ग – अनुप्रयुक्तव्याकरण □15 अङ्काः

खण्ड□घ – पठित अवबोधनम् □10 अङ्काः

**1.** *** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **10**

आदिकालादेव अस्माकं देशः भारतं जगति प्रसिद्धम् अस्ति। भारतस्य प्रतिष्ठे द्वे- संस्कृतं संस्कृतिस्तथा। संस्कृतभाषा अस्य प्राचीनज्ञानविज्ञानयोः पोषिका महत्संस्कृतेः च संवाहिका अस्ति। कथ्यते अपि भारतीया संस्कृतिः संस्कृते एव निहिता वर्तते। विविधतायाम् एकता एव अस्माकं संस्कृतेः प्रधानम् अभिधानम्। यथा अत्र जनानां विविधाः सम्प्रदायाः, विविधाः भाषाः, पूजापद्धतयः वेशभूषाः च सन्ति परम् अनेकतायाम् अपि एकतायाः मधुरा धारा प्रवहति। न केवलम् एतावदेव अपितु अस्य देशस्य प्रकृतिः अपि विविधतां धारयति। अस्मिन् देशे सर्वे ऋतवः क्रमेण आगच्छन्ति। ते च वसन्तः ग्रीष्मः वर्षा शरद् हेमन्तः शिशिरः इति। अत्र भिन्नभिन्न-भाषाभाषिणः मतावलम्बिनः सर्वे भारतीयाः एकं राष्ट्रध्वजं नमन्ति एकं राष्ट्रगानं च गायन्ति। एते राष्ट्रिय-उत्सवान् सामाजिक-उत्सवान् च मिलित्वा आयोजयन्ति। भारतस्य वैशिष्ट्यमेतद् सर्वदा निरन्तरं च भवेद् इति सर्वैः भारतीयैः काम्यते। भारतं पुनः विश्वगुरुं कर्तुं सर्वे भारतीयाः प्रयतन्ते।

**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) प्राचीनज्ञानविज्ञानयोः पोषिका का भाषा ?

(ii) अस्माकं देशे के क्रमेण आगच्छन्ति ?

(iii) आदिकालादेव कः देशः जगति प्रसिद्धम् अस्ति ?

**आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) भारतीयाः किं कर्तुं प्रयतन्ते?

(ii) अस्माकं संस्कृतेः प्रधानम् अभिधानं किम् ?

(iii) सर्वैः भारतीयैः किं काम्यते ?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) 'धारयति' इति क्रियापदस्य कर्तृपदं किं भवेत्?

(क) विविधताम् (ख) एतावदेव

(ग) केवलम् (घ) प्रकृतिः

(ii) 'प्रधानम्' इति विशेषणपदस्य विशेष्यपदं किम्?

(क) संस्कृतेः (ख) अभिधानम्

(ग) विविधतायाम् (घ) एकता

|  |  |  |
|---|---|---|
|  | (iii) 'अस्माकं देशः भारतं जगति प्रसिद्धम् अस्ति।' अत्र किं क्रियापदम्?<br>(क) भारतम् (ख) जगति<br>(ग) अस्ति (घ) देशः<br>(iv) 'विविधतायाम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?<br>(क) अनेकतायाम् (ख) एकतायाः<br>(ग) भारतीयाः (घ) सम्प्रदायाः |  |

|  |  |  |
|---|---|---|
| 2. | *** भवतः अनुजः तनिष्कः पठनं त्यक्त्वा चलदूरभाषयन्त्रेण क्रीडने सर्वदा व्यस्तः भवति। तं पठनार्थं प्रेरयन् लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखत –**<br><br>परीक्षाभवनात्<br>तिथिः .......................<br>प्रिय (i) ........................ !<br>शुभाशीषः।<br>ह्यः एव मातुः (ii) ............ प्राप्तम्। माता अद्यत्वे पठने तव (iii)................ दृष्ट्वा चिन्तिता अस्ति। त्वं पठनं त्यक्त्वा चलदूरभाषयन्त्रेण (iv) .................. रतः भवसि। अर्धवार्षिक-परीक्षायाम् अपि तव (v) .......... न्यूनाः आगताः। एतद् तु न (vi) ...........। यद्यपि क्रीडनम् अपि (vii) ................. आवश्यकं परं तत् शारीरिकं भवेत्। क्रीडनेन सह पठनम् अपि अत्यावश्यकम्। ये चलदूरभाषयन्त्रेण अत्यधिकं समयं वृथा यापयन्ति ते न केवलं (viii) ......... अस्वस्थाः भवन्ति अपितु जीवने असफलाः अपि। अतः मम (ix) .......... अस्ति यत् समयस्य महत्त्वम् अवगत्य (x) .................. ध्यानेन पठ। मातृपितृचरणयोः मे प्रणामाः कथनीयाः।<br><br>तव अग्रजः,<br>मोहितः<br><br>**मञ्जूषा**<br>त्वम्, मानसिकरूपेण, पत्रम्, स्वास्थ्याय, अरुचिम्, तनिष्क, अङ्काः, क्रीडने, उचितम्,परामर्शः। | ½x10=5 |

**3.** *** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –** 1×5=5



**मञ्जूषा –**

| |
|---|
| यज्ञपात्रम्, अग्निः, बालकाः, मन्त्रोच्चारणम्, विद्यालयः, श्रद्धया, आसनानि, तिष्ठन्ति, प्रज्वलति, भवनम्, पादपाः, यज्ञं कुर्वन्ति। |

**अथवा**

*** निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -** 1×5=5

**"दिल्ली-विश्वपुस्तकमेलकम्"**

**संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**

**"दिल्ली-विश्वपुस्तकमेलकम्"**

**मञ्जूषा**

| |
|---|
| प्रतिवर्षम् , प्रगतिमैदान इति स्थले, फरबरी-मार्चमासे, विविधानि पुस्तकानि, आपणिकाः, आयोज्यते, जनसम्मर्दः, विभिन्नाः प्रकोष्ठाः, पुस्तकप्रेमिणः, साहित्यिक-गोष्ठ्यः, भवन्ति, सांस्कृतिककार्यक्रमाः, अल्पमूल्येन। |

**4.** *** अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-** ½×10=5

एकः टोपिकाविक्रेता आसीत्। सः एकदा (i) ------------- विक्रेतुं ग्रामान्तरं गच्छन् आसीत्। (ii) ------------ सः श्रान्तः अभवत्, अतः(iii) ----------- अधः स्थित्वा शयनम् अकरोत्। तत्र बहवः वानराः आसन्। (iv) ----------- तस्य टोपिकाः स्वीकृत्य वृक्षस्य उपरि अतिष्ठन्। (v) ---------- टोपिकाविक्रेता जागृतः अभवत् तदा सः टोपिकाः न दृष्ट्वा बहु (vi) ---------- अभवत्। सः एकम् (vii) ---------- अकरोत्। सः वानराणां पुरतः स्थित्वा स्वस्य टोपिकां दूरम्

| | | |
|---|---|---|
| | अक्षिपत्। (viii) ------------ वानराः अपि स्वस्य स्वस्य टोपिकाः अधः (ix) ----------। चतुरः टोपिकाविक्रेता टोपिकाः एकत्रीकृत्य प्रसन्नः भूत्वा ततः (x) ------। अतः कथ्यते- **बलात् बुद्धिः श्रेष्ठा।**<br><br>**मञ्जूषा**<br><br>अगच्छत्, अनुकरणशीलाः, वृक्षस्य, दुःखी,<br>यदा, उपायम्, मार्गे, अक्षिपन्, टोपिकाः, ते<br><br>**अथवा** | |
| | *** रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**<br><br>**जनकः** - पुत्र केशव! (i) ------------------------------------ ?<br>**पुत्रः** - हे जनक! अहं 'गीतां' पठामि।<br>**जनकः**- शोभनम् , 'गीता' इति बहु उत्तमः ग्रन्थः अस्ति। 'गीता' महाभारतस्य भागः अस्ति यस्मिन् सप्तशत श्लोकाः सन्ति।<br>**पुत्रः** - आम्, (ii) ------------------------------------------।<br>**जनकः** - सत्यम्। किं त्वं जानासि यत् महाभारतस्य लेखकः कः अस्ति ?<br>**पुत्रः** - आम् , जनक! (iii) ------------------------------------------।<br>**जनकः** - उत्तमम्, संस्कृतस्य प्रसिद्धौ ग्रन्थौ कौ ?<br>**पुत्रः** - अहं मन्ये, (iv) --------------------------------------।<br>**जनकः** - सत्यम्, त्वं बहु जानासि। अहं बहु प्रसन्नः अस्मि।<br>**पुत्रः** - धन्यवादः पितः! (v) --------------------------------------।<br><br>**मञ्जूषा**<br><br>• अस्य लेखकः महर्षिः वेदव्यासः अस्ति।<br>• त्वम् एतावद्-ध्यानेन किं पठसि?<br>• अहं पठामि अतः जानामि।<br>• एतौ प्रसिद्धौ ग्रन्थौ 'रामायणम्' 'महाभारतम्' च स्तः।<br>• एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धकाः उपदेशाः सन्ति। | 1×5=5 |
| | | |

| | अनुप्रयुक्तव्याकरणम् (25 अङ्काः) | |
|---|---|---|
| **5.** | *** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) जीवाः **<u>सर्वेऽत्र</u>** मोदन्ताम्।<br>(ii) प्रजहि **<u>हि+एनं</u>** ज्ञानविज्ञाननाशनम्।<br>(iii) कश्चिद् **<u>उद्दण्डः</u>** बालकः उवाच।<br>(iv) **<u>क्रोध एषः</u>** रजोगुणसमुद्भवः।<br>(v) कथमिव पश्येयं **<u>चक्षुः+हीनः</u>**। | **1×4=4** |
| | | |
| **6.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) हिमाद्रितुङ्गश्रृङ्गैः सुशोभिता **<u>सूर्योदयभूमिः</u>** इयम्।<br>(क) सूर्यस्य भूमिः (ख) सूर्योदयस्य भूमिः<br>(ग) सूर्योदयेन भूमिः (घ) सूर्योदयः भूमिः<br>(ii) वानराणां **<u>यूथपः</u>** सर्वान् वानरान् अवदत्।<br>(क) यूथस्य पतिः (ख) यूथं पिबति इति<br>(ग) यूथं पाति इति (घ) यूथस्य पः<br>(iii) सर्वेषामपि महत्त्वं विद्यते **<u>समयम् अनतिक्रम्य</u>**।<br>(क) समयम् यथा (ख) यथासमयम्<br>(ग) समयानुसारम् (घ) यथासमयः<br>(iv) सः **<u>सकरुणम्</u>** उच्चैः अक्रन्दत्।<br>(क) करुणया सह (ख) सह करुणम्<br>(ग) करुणा सह (घ) सा करुणा<br>(v) ततः प्रविशतः **<u>व्यासनारदौ</u>**।<br>(क) व्यासः नारदः (ख) व्यासौ नारदौ च<br>(ग) व्यासः नारदौ च (घ) व्यासः च नारदः च | **1×4=4** |
| | | |

| | | |
|---|---|---|
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) <u>**विपुला**</u> च अत्र वनसम्पदा।<br>(क) विपुलः + टाप् (ख) विपुल + टाप्<br>(ग) विपुल + ङीप् (घ) विपुल + इक्<br>(ii) विद्वांस एव <u>**चक्षुष्मन्तः**</u> प्रकीर्तिताः।<br>(क) चक्षुस्+मत् (ख) चक्षुः+मतुप्<br>(ग) चक्षुर्+मतुप् (घ) चक्षुस्+मतुप्<br>(iii) ईटा हि यस्यास्ति <u>**पुर+ङीप्**</u> प्रधाना।<br>(क) पुरा (ख) पुरः<br>(ग) पुरी (घ) पूर्णा<br>(iv) अस्मिन् अवसरे <u>**समाज+ठक्**</u> कार्यं क्रियते।<br>(क) सामाजिकम् (ख) सामाजिकः<br>(ग) सामाजिकी (घ) सामाजिका<br>(v) <u>**अवक्रता**</u> यथा चित्ते तथा वाचि भवेत्।<br>(क) अवक्र+टाप् (ख) अवक्र+तल्<br>(ग) अवक्र+ङीप् (घ) अवक्र+त्व | **1×4=4** |
| | | |
| **8.** | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>आदित्यः – वैभव! इदानीं त्वया किं क्रियते ?<br>वैभवः – आदित्य! अधुना तु मया (i) ----------- क्रियते। का वार्ता ?<br>आदित्यः – नास्ति विशेषः। (ii) ----------- क्रीडितुं बहिः गम्यते, त्वमपि आगच्छ।<br>वैभवः – न। श्वः मम परीक्षा भविष्यति अतः अद्य (iii) ----------- सम्पूर्णदिने पठामि।<br>आदित्यः –अस्तु, किन्तु त्वं किं पठसि ?<br>वैभवः – गणितविषयस्य परीक्षा भविष्यति अतः मया गणितविषयः(iv) ----------।<br>**मञ्जूषा**<br>अस्माभिः, पठ्यते, अध्ययनम्, अहम् | **1×3=3** |

| | | |
|---|---|---|
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्)**<br>(i) सौम्या प्रातः --------- 4:00 वादने उत्तिष्ठति।<br>(ii) ततः सा -----------05:15 वादने योगाभ्यासं करोति।<br>(iii) तदनन्तरं सा ------------- 7:45 वादने विद्यालयं गच्छति।<br>(iv) ----------- 2:30 वादने आगत्य सा पुनः भोजनं करोति। | 1×3=3 |
| | | |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) प्राणत्राणाय अश्वाः ----------- अधावन्।<br>(ii) यूयं सर्वे -------- मम प्रियाः।<br>(iii) अभ्यासेन तु कौन्तेय वैराग्येण ----------- गृह्यते।<br>(iv) अर्जुन! त्वम् ------- मुञ्च ब्रह्मास्त्रम् एतत् निवारयितुम्।<br>(v) ---------- विषादं त्यक्त्वा उद्यमः क्रियताम्।<br>**मञ्जूषा**<br>इदानीम्, अपि, इतस्ततः, एव, च | 1×4=4 |
| 11. | *** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) प्रबुद्धौ **<u>ते</u>** दम्पती आश्चर्येण अतिष्ठताम्।<br>(क) सा (ख) तौ<br>(ग) ताः (घ) तानि<br>(ii) कुमार्गम आश्रितस्य मम **<u>कीदृशः</u>** इयं क्लेशपरम्परा।<br>(क) कीदृशम् (ख) कीदृश्यः<br>(ग) कीदृशाः (घ) कीदृशी<br>(iii) त्वं नर्तनात् अन्यत् किम् अपरं **जानाति**?<br>(क) जानन्ति (ख) जानन्ति<br>(ग) जानामि (घ) जानासि<br>(iv) राजा वैद्यान् आहूय **<u>पृच्छतु</u>**।<br>(क) अपृच्छत् (ख) प्रक्ष्यन्ति<br>(ग) अपृच्छः (घ) अपृच्छन् | 1×3=3 |

पठितावबोधनम् (30 अङ्काः)

**12.** **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **5**

तस्य वचनं श्रुत्वा अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- 'भो! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्‌गदम् उक्तवान्- रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।

**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) मदोद्धताः के आसन् ?

(ii) कः सगद्‌गदम् उक्तवान् ?

(iii) वह्निज्वालाः कुत्र समुत्थिताः ?

**आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) साश्रुनयनो यूथपतिः सगद्‌गदं किम् उक्तवान्?

(ii) मेषः किमर्थं भूमौ लुठति ?

(iii) कीदृशः मेषः अश्वशालां प्रविशति ?

*** इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) 'अवदन्' क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(ii) 'यूथपतिः' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?

(iii) 'भूमौ' इत्यस्य किं पर्यायपदं प्रयुक्तम् ?

---

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) केषां सदा दुःखं भवति ?

(ii) भारत्याः कोशः कथं वर्धते ?

(iii) मनुष्यः कां समाचरेत् ?

*** इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) "अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।" अत्र वाक्ये क्रियापदं किम् ?

(ii) 'दुःखम्' इत्यस्य किं विपर्ययपदं प्रयुक्तम्?

(iii) 'अपूर्वः' इत्यस्य विशेष्यपदं चित्वा लिखत।

**14.** **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **5**

श्रीकृष्णः - भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

युधिष्ठिरः - भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।

श्रीकृष्णः - न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

युधिष्ठिरः - अप्येवम् ! आचार्येण कीदृशः अनर्थः कृतः। किं चपलबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम् ?

श्रीकृष्णः - शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता। किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः।

अर्जुनः - अपरं च अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत्।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) आचार्यः द्रोणः कं सावधानम् अकरोत् ?

(ii) भीमसेनः कं हन्तुम् अभिधावति ?

(iii) द्रौणेः प्रकृतिः कीदृशी आसीत् ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) कदा सर्वा पृथ्वी दग्धा स्यात् ?

(ii) द्रोणेन अर्जुनाय कथं ब्रह्मास्त्रशिक्षा प्रदत्ता ?

(iii) अश्वत्थामा कुतः ब्रह्मशिरो नाम अस्त्रं प्राप्तवान् ?

*** इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) 'पर्याप्तम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(ii) 'जानाति' इति क्रियापदस्य कर्तृपदं किम् अत्र प्रयुक्तम् ?

(iii) 'दग्धा' इत्यस्य विशेष्यपदं चित्वा लिखत।

---

**13.** **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **5**

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥
पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम्।
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्॥

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) सरस्वत्याः कोशः कीदृशः मन्यते ?

(ii) अयं कोशः कथं क्षयमायाति ?

(iii) पुण्यकर्मणां फलं किम् ?

| | | |
|---|---|---|
| 15. | * रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)<br>(i) मम पिच्छानाम् **अपूर्वं** सौन्दर्यम्।<br>(ii) अयं पुरुषः **पापं** चरति।<br>(iii) राजा **शक्राय** चक्षुः समर्पितवान्।<br>(iv) एतद् **मनुष्येषु** न प्रयोक्तव्यम्।<br>(v) मधुरभाषिणी **वाणी** पुरुषं प्रह्लादयति।<br>(vi) वयं **स्थलानि** द्रष्टुम् उत्सुकाः स्मः। | 1×5=5 |

| | | |
|---|---|---|
| | **अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**<br>असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।<br>अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते ॥<br>**भावार्थः**- हे महाबाहो! अत्र संशयः नास्ति यत् एतत् (i) ------------ अतीव चञ्चलम् अस्ति। इदं (ii) --------- नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) -------------- कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) ----------------।<br>**मञ्जूषा**<br>बहुकष्टेन, अभ्यासम्, शक्नुमः, मनः | ½×4=2 |
| | | |
| 17. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) यः इच्छत्यात्मनः **श्रेयः**।<br>(क) अर्घ्यम् (ख) गृहम्<br>(ग) कल्याणम् (घ) अमूल्यम् | 1×4=4 |

| | | | |
|---|---|---|---|
| | (ii) **<u>सर्वदा</u>** शारदा सदैव अस्माकं मुखे निवसेत्।<br>(क) सर्वदायिनी (ख) सर्वम्<br>(ग) सर्वहितम् (घ) वीणासहिता<br>(iii) अहर्निशं **<u>महानसं</u>** प्रविश्य यत् पश्यति तद् भक्षयति स्म।<br>(क) महानाशम् (ख) भोजनशालाम्<br>(ग) महान्तम् (घ) महती<br>(iv) अस्माकं क्षेत्रे सुवर्णपूरितः **<u>कलशः</u>** विद्यते।<br>(क) कलेशः (ख) काकः<br>(ग) सर्वत्र (घ) घटः<br>(v) तस्याहं **<u>निग्रहं</u>** मन्ये वायोरिव सुदुष्करम्।<br>(क) न्यासः (ख) वशीकरणम्<br>(ग) नेत्रम् (घ) प्रसन्नः | | |
| | | | |
| **18.** | **अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत –**<br>एकदा भगवान् बोधिसत्त्वः (i) ------------ राजा अभवत्। सः महान् दानी, विनयशीलः, वृद्धोपसेवी च (ii) -------------। तस्य दानशीलताम् श्रुत्वा (iii) ------------- देशेभ्योऽपि जनाः तस्य देशम् आयान्ति स्म। एकदा शक्रः अपि तस्य (iv) ----------------- परीक्षितुम् आगच्छत्। सः नेत्रहीनयाचक-रूपेण आगत्य तं राजानम् एकं (v) ---------------- अयाचत। राजा तस्मै चक्षुर्द्वयमेव प्रायच्छत्। प्रसन्नः (vi) -------------- कतिपयेभ्यः दिनेभ्यः पश्चात् पुनः राज्ञः पुरतः उपस्थितः अभवत्। सः राज्ञः त्यागवृत्तिं प्रशंसन् नेत्रद्वयमपि प्रत्यस्थापयत्। अपि च शतयोजनपर्यन्तं (vii) ------------ पारं द्रष्टुं समर्थः भव इति तस्मै वरम् अयच्छत्। उच्यते अपि- नास्ति त्यागसमं (viii) -----------------।<br>**मञ्जूषा**<br>आसीत्, शिवीनाम्, सुखम्, शैलानाम् | ½×8=4 | |